# चतुर्थोऽध्यायः

## (ज्यौतिष  कर्मकाण्डयोविमर्शः)

# चतुर्थोऽध्यायः
## (ज्यौतिष  कर्मकाण्डयोविमर्शः)

1.पुराणेषु  षोडशसंस्काराणाम्  कर्मकाण्डीयप्रयोगाः।

2.मेलापके  ज्यौतिषकर्मकाण्डीयविर्मशः।

3.और्ध्व-दैहिकक्रियायाम्  कर्मकाण्डीयप्रयोगाः।

4.यज्ञादिषु  ज्यौतिषशास्त्रस्य  आवश्यकता  ।

# 1.पुराणेषु षोडशसंस्काराणाम् कर्मकाण्डीयप्रयोगाः

अष्टादशपुराणानाम् कर्ता सत्यवती सुतः। इति उकत्याधारेण पुराणानां कर्ता महर्षिः व्यासः वर्तते। पुराणेषु मानवस्य जीवनोन्नतिकारकाः विशिष्टाः प्रकाराः सन्ति। यथा- धार्मिक- सामाजिक -सांस्कृतिक-राजनैतिक अपि च पंचदेवोपसनानां निरूपणं लौकिक-पारलौकिक सुखसाधनं इत्यादयः बहवोः विषयाः पुराणद्वारैव मनुष्याः सरलतया सुखेन च ज्ञातुं शक्नुवन्ति।

पुराणेषु धर्मशास्त्रीय नियमाःऽपि प्राप्यन्ते। तत्र सर्ववर्णानाम् कृते अभ्युदयकारकं कृत्यं वर्णितमस्ति। मनुष्यस्य जीवनोन्नत्यैः संस्काराणां विधानं धर्मग्रन्थेषु कथ्यते। तदेव संस्काराणां विवचनम् पुराणेष्वपि प्राप्यते। महर्षि व्यासस्य षोडशसंस्काराः प्रसिद्धाः सन्ति। पुराणेषु परस्परयो विरोधः दृश्यते तद्विरोधः आन्तरिकरूपेण नैवास्ति। अत्र पुराणाधारीकृत्यैव संस्कार विषये उपस्थाप्यते। पुराणेषु श्रीमद्भागवतम् प्रधानरूपेण सुखोपलब्धये पुराणानामेव आश्रयत्वं स्वीकरणीयम्।

श्रुता ते मानवा धर्मा वैदिकाश्च श्रुतास्त्वया।
कलौ युगे न शक्यन्ते ते वै कर्तुं नराधिपः।।
सुखोपायकल्प धनमल्क्लेशं महाफलम्।
पुराणानं च सर्वेषां सारभूतं महामते।

एकादश्यां न भुज्जीत पक्षयोरुभयोरपि।।[1](पद्यम-6/53/4-6)

दुरुहार्थस्य ज्ञानं साधारणबुद्धिगम्यं नास्ति। अल्पत्रानां जीवानां तद्सम्भवमत्वा मन्वादिभिः महषिर्भिः समाधिद्वारा प्राप्तया निर्मलबुद्धया वेदार्थान् स्मारं-स्मारं तत्तस्मूर्तिनां निर्माणं कृतम्। ततो भगवान् व्यासः वेदप्रतिपादितानि स्मृत्यनुमोदितानि च विविधानि धार्मिकतत्वानि सरलतया अथवोधयितुं प्राज्जंलयाभाष पुराणानि रचयाच्चकार। अतोधर्मनिर्णये एषां त्रयाणामेव मुख्यतः विद्यते। पुराणेषु धर्मनिर्णये, व्यासेव प्रधानः वर्तते। अनेन कारणेन षोडशसंस्काराणां कर्मकाण्डविधिद्वारा वर्णनं एषु पुराणेषु प्राप्यते तदत्र उदाहृियते।

पुराणानाम् वैशिष्ट्यम् अद्यापि स्वीक्रियते यदा वेदोक्त अर्थाः लोकानां अवबोधुं समर्थाः न तदा पुराणानां रचना जाता। मनुष्यस्य जीवनस्य उत्कर्षाय संस्कारणां नियमाः निर्धारिता अत्र संस्काराणां विवेचनं इदमस्ति।

षोडशसंस्काराणां वर्णनं प्रायेण धर्मसूत्रेषु प्राप्यते ततः संस्कारः भास्करगृह्यसूत्रे, पारास्करगृह्यसूत्रेऽपि अस्य विवेचनं प्राप्यते---

गर्भाधान मतश्च पुंसवनकंसीमान्तजातविधे।
नामख्यं सह निष्क्रमेण च तथाऽन्नप्राशनं कर्म च।।
चूडाख्यं व्रतबन्धकेशयथ चतुर्वेदव्रतानां पुरः।
केशान्तः सविसर्गकः परिणयः स्यात् षोडशीकर्मणाम्।।[1]

---

1.संस्कार भास्कर, 1/1

पुराणकाले संस्कारस्य अतीप महत्वमासीत्। तत्काले मुख्यत: षोडशसंस्कारा: मन्यन्यन्ते स्म।

**पुराणेषु कर्मकाण्डप्रयोगा: ----**

पुराणाधारेण षोडशसंस्कारस्य विवेचनं ईदृशी अस्ति। तद्यथा --

1. गर्भाधानसंस्कार:।
2. पुंसवनसंस्कार:।
3. सीमन्तोन्नयनसंस्कार:।
4. जातकर्मसंस्कार:।
5. नामकरणसंस्कार:।
6. निष्क्रमणसंस्कार:।
7. अन्नप्राशनसंस्कार:।
8. चूड़ाकरणसंस्कार:।
9. उपनयनसंस्कार:।
10. चत्वारिवेदव्रत ऋग्वेद:।
11. यजुर्वद:।
12. सामवेद:।
13. अर्थर्ववेद:।
14. समावतर्नसंस्कार:।
15. केशान्तसंस्कार:।
16. विवाहसंस्कार:।

एतेषां विविध संस्काराणां वर्णनं स्मृति एवं पुराणग्रन्थाधारेण प्राप्तः। पुराणकाले त्रयोवर्णद्विजाः ज्ञातः तेषां निषेकादिषोडशसंस्काराः समंत्रतः संस्काराः कुर्यात्, किन्तु कन्यकाश्च गर्भाधानादिचौलतां अष्टसंसकाराः अमंत्रकाः एवं शूद्राणां सर्वे संस्काराः अमंत्रकाः।

यथा - स्त्रीणां मंत्ररहित संस्कारः।

अमन्त्रिका तु कार्येयं स्त्रीणामावृदशेषतः।
संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम्।।

**विष्णुपुराणे संस्काराणां विवेचनम् :----**

विष्णुपुराणे संस्कारवर्णन विशेषतः जातर्कमसंस्कारः, नामकरणसंस्कारः, विवाहसंस्कारः, जातकर्मसंस्कारे पितृहस्ते आभ्युदिक एवं दधि बदरिप्रमाणैः विष्णुदानं कुर्यात्। अस्मिन् पुराणे पच्चदशांशे अष्टत्रिंशतोऽधाये संक्षिप्त अन्त्येष्टिसंस्कार वर्णनमपि प्राप्यते।

**जातकर्मसंस्कारः -----**

जातस्य जातकर्मादिक्रियाकाण्डशेषतः।
पुत्रस्य कुर्वीत पिता श्राद्धं चाभ्युदायात्मकं।।
युग्मांस्तु प्राङ्गमुखान्विप्रान्भोजयेमनुजेश्वर।
यथा वृत्तिस्तथा कुर्यादेव यं द्विजन्मनाम्।।[1]

---

1. वि.पु. 4-5, तृतीय अंश, पृ.-188

**नामकरणसंस्कारः ---**

ततश्च नाम कुर्वीत पितैव दशमऽहनि।

देशपूर्वं हि शर्मवर्मादिसंयुतम्।।8

नार्थहीनं न चाशस्तं नापशब्दयुतं तथा।

नामङ्गलयं जुगुप्स्यं वा नाम कुर्यातसमाक्षरम्।।10

नातिदीर्घं नातिहस्तं नातिगुर्वक्षरान्वितम्।

सुखोच्चार्य तु तन्नाम कुर्याणित्प्रवणाक्षरम्।।11

**विवाहसंस्कारः -----**

न दुष्टावाक्यां वा व्यङ्गिनी पितृमरतृतः।

न श्मश्रुव्यज्जनवतीं न चैव पुरुषाकृतिम्।।18

न घर्घरस्वरां क्षामां तथा काकस्वरां  न च।

नानिबन्धक्षाणां ताद्‌दृताहुर्जी नोद्‌देश्यधुः।।19

यस्याश्च रोमशेजङ्गघें गुल्फौ यस्यास्थोन्नती।

गण्डयोः कपूरौ यस्या सन्यत्यास्तां न चोद्‌देत।।20

नाति रुच्छविं पाण्डुकरजामरूणेदुहुजणाम्।

आधीनहस्तपात्रं च न कन्यामुद्‌दहेद बुधः।।[2] 21

---

1 वि.पु. 8,10-11, तृतीय अं., पृ.-189-90

2. वि.पु. 18-21, तृ.अं.

**अष्टविवाहः ---**

विष्णुपुराणे विवाहस्य अष्टप्रकारस्य चर्चा प्राप्ते। यथा --

ब्राह्मो दैवस्तथैवार्षं प्रजापत्यस्तथासुरः।
गान्धर्वराक्षसौ चान्यौ पैशाचाद्याष्टमो।।
एतेषां यस्य यो धर्मो वणस्य महर्षिर्भिः।
कुर्वीत दारग्रहणं तेनान्यं परिवर्जयेत।।25[1]

**अन्त्येष्टिसंस्कारः ---**

विष्णुपुराणे अन्त्येष्टिसंस्कारस्य वर्णनमपि प्राप्यते। यथा ---

अर्जुनोऽपि तदन्विषय रामकृष्णकलेवरे।
संस्कारे लम्भ्यमास तथान्येषामनुक्रमात्।।
अष्टी महिष्यः कथिता रुक्मिणीप्रमुखास्तु याः।।
उपगुह्य हरेर्देहं विविशुस्ता हुताशनम्।।
रेवती चापि रामस्य देहमाशिखाय सत्वमा।
विवेश ज्वलितं वर्हि तथैवानकदुन्दुभिः।। [2]

असिमन् पुराणे सामाजिकजीवन, विवाहसंस्कारस्य, विवाह--संस्कारस्योद्देश्यं, महत्वम्, गृहस्थाश्रममहत्वम्, हिन्दूसंस्काररीत्या विधिवर्णनं विधिक्रमः इत्यादि वर्णनं प्राप्यते।

---

1.विष्णुपुराण, 24-25/10 तृ.अं.

2.विष्णुपुराण, 1-3/38,

**ब्रह्मपुराणे संस्काराणाम्विवेचनम् :---**

अस्मिन् पुराणे प्राचीनकालादारभ्य अद्यावधि पर्यन्तम् भारतीय सामाजिक जीवन मध्ये विवाहसंस्कारः सर्वे संस्काराणां मध्ये प्रमुख संस्कारः मन्यते। वैदिककालतः विवाह गृहस्थाश्रमे स्थित देवार्चना सन्तानसुख प्राप्ति भवेत्। परवर्ती समये एवं स्मृति इत्यादि विविध गन्थे विवाह संलग्न उद्देश्यं त्रयं प्राप्यते।

1.धर्मसुख 2.प्रजासुख 3.रतिसुख

ब्रह्मपुराणेष्वपि आसुरविवाहः, गांधर्वविवाहः, राक्षसविवाहः, पैशाचविवाहः, ब्राह्मविवाहः, दैवविवाहः, आर्षविवाहः, प्रजापत्यविवाहः कथिता सन्ति। एतद् अतिरिक्तं स्वयंवरविवाहः विवाहः अपि प्राचीनकाले उक्तः। विशेषकर अयं विवाहः शासक वर्गे प्रचलितः।

**भविष्यतपुराणे संस्काराणाम् विवेचनम् :--**

गर्भाधिन, पुंसवन, सीमन्तोन्नयनं, जातकर्म, नामकरण, अन्नप्राशनं, चौलकर्म, उपनयनं, चत्वारवेदव्रतानि स्नानं, सहधर्मचारिणीसंयोग पच्चानां यज्ञानुष्ठानमष्टका पावर्णः, श्राद्धं, श्रावण्यागृहायणीचैत्री अश्वियुजीति पाक्कसंस्था अग्न्याधमग्निहोत्रं दर्शपूर्णमास चातुमास्यान्याग्रणेदिष्टनिरुढ़पशु-बन्धत्सौत्रामणीति अग्निष्टोम उक्तः षोडशीवाजपेयोऽतिरात्रोर्याम इति सप्तयज्ञसंस्था इत्येते चत्वारिंशषत्संस्काराः भविष्यतपुराणे प्राप्यते।

**अग्निपुराणे संस्काराणाम् विवेचनम् :---**

अग्निपुराणे अपि संस्काराणां वर्णनं प्राप्यते। आश्रमेस्थितपुरुषाणां धर्मस्यवर्णनं करोतु। स्त्रीणां ऋतुधर्मषोडशरात्री तत् प्रथम त्रय रात्री निन्दितः ज्ञातः शेष रात्री युग्म अर्थात चतुर्थ, पंचम, अष्टमी एवं दशमी रात्री पुत्रकामना इच्छेत तर्हि स्त्रीणां उपभोग कुर्यात तन्नाम गर्भाधानसंस्कार कथ्यते। एवं रीत्या सीमान्तोन्नयन संस्कारः, चूडाकरण संस्कार, विवाहसंस्कार इत्यादि संस्काराणां वर्णनं भविष्यपुराणे प्राप्यते।

**शिवमहापुराणे संस्काराणां वर्णनम् :----**

शिवमहापुराणे द्वितीया रुद्रसंहिताया पार्वतीखण्डे नामकरणसंस्कार तस्याः बालक्रीडावर्धनम्। सप्तविंशतिऽध्याये विवाहसामग्री वर्णनं तथा अष्टचत्वारिंशतोऽध्याये कन्यादानप्रकार वर्णनञ्च प्राप्यते।

**नारदपुराणे संस्काराणां वर्णनम् :---**

नारदपुराणे स्मार्तधर्मवर्णन प्रकरणे गर्भाधानादिसंस्कारः वर्णन गर्भाधानादिसंस्कारस्य कालनिर्णय, जातकर्मसंस्कार, उपनयनसंस्कार इत्यादि वर्णनं प्राप्यते।

**शिवमहापुराणे संस्काराणाम् वर्णनम् :---**

द्वितीयरुद्रसंहितायाः पार्वतीखण्डे सप्तमोऽध्याये पार्वतीनामकरण--संस्कारोत्तर बालक्रीडा वर्णनं प्राप्यते।

पार्वतीखण्डे सप्तत्रिंशतोऽध्याये विवाहसंस्कारे विवाहसामग्रीवर्णनम्।

अष्टाचत्वारिंशतोऽध्याये शिवाशिवर्योविवाहविधि कथन कन्यादानादि प्रकारवर्णनंच्च। तृतीयांशरुद्रसंहितायां चतुर्दशोऽध्याये विहितोपनयनादि सहित विविधसंस्कार वर्णनं च प्राप्यते।

**मत्स्यपुराणे संस्काराणाम् वर्णनम् :----**

योगमाहातम्यनाम्ने द्विपच्चशत्तमोऽध्याये अष्टात्मगुणासंस्कार वर्ण्यते।

**वामनपुराणे संस्काराणाम् वर्णनम् :---**

वामनपुराणे वामनप्रादुर्भावे वामनजन्मनाम नवाशीतितमोऽध्याये जातकर्मादिसंस्कार वर्णनं प्राप्यते।

**श्रीमद्भागवतमहापुराणे संस्काराणाम् वर्णनम् :---**

श्रीमद्भागवतमहापुराणे दशमस्कन्धे, पंचमोऽध्याये भगवत् श्रीकृष्णस्य जातकर्मसंस्कारवर्णनम्।

दशमस्कन्धस्य अष्टमोऽध्याये भगवन्तौ कृष्णबालरामयोः नामकरणसंस्कारः प्राप्तः। एवं रीत्या दशमस्कन्धे पञ्चत्वारिंशतोऽध्याये कृष्णबलरामयोः यज्ञोपवीतसंस्कार वर्णनं प्राप्यते। एवं एकादश स्कन्धे सप्तमोऽध्याये वर्णाश्रम धर्मनिरूपवर्णनम् प्राप्तः।

धर्मसूत्रेष्वपि संस्काराणां विवेचनं प्राप्यते। तत्र छान्दोग्यगृह्यसूत्रे, पारास्करगृह्यसूत्रे, लौगाक्षीकारकगृह्यसूत्रे, आपस्तम्बगृह्यसूत्रे, बौधायिनीगृह्यसूत्रे। च एतेषां संस्काराणां धर्मशास्त्रीयविधि–अनुसारेणैव वर्णनं प्राप्यते।

# 2.मेलापके ज्यौतिषकर्मकाण्डीयविर्मशः

विवाहसंस्कारपूर्वम् वरकन्ययोः मेलापकं क्रियते तत्र ज्योतिषशास्त्रस्य अनेकेषु ग्रन्थेषु उभयोः वरवध्वोः अतिसूक्ष्मरूपेण विचारः प्राप्यते। तत्र अंषस्तक्बसूत्राधारेण प्रारम्भिकनियमाः कथिताः। यथा ---

समान गोत्र प्रवरोकन्या यदि विवाहः क्रियते तदा वंशहानिः जायते। अनेनकारणेन के च अस्वीकर्तव्यः भवन्ति तदेव आधारीकृत्यैव उभयोः मेलापकं क्रियते। तत्र मेलापके कानि तत्वानि स्वीकर्तव्यानि इति लिख्यते। यथा ---

1. राशिविचारः
2. वर्णविचारः
3. वश्यविचारः।
4. योनिविचारः।
5. योनिवैरम् विचारः।
6. राशीश मित्रामित्र विचारः।
7. गणविचारः
8. नाड़ीविचारः च भवति।

एतेषां विचाराणां पृथक-पृथक रूपेण गुणाः सन्ति। तेषां गुणानां योगः भवति षट्त्रिंशत् (36) तत्र अष्टादश तः विवाहयोग्याः भवन्ति। अस्य मेलापकस्य नियमाः पृथक-पृथक ग्रन्थेषु ज्योतिषशास्त्रस्य प्राप्यन्ते।

अस्मिन् विषये कथ्यते ---

गुणैः षोडशभिर्निन्द्यमध्यमाविंशतिस्तथा।
श्रेष्ठत्रिंशतगुणं यावत्परतस्तून्तमोत्तमम्।।

**वरकन्ययोः मेलापकसंबंधिविचारः ---**

वर्णो वश्यं तथा तारा योनिश्च ग्रहमैत्रकम्।
गणमैत्रं भकूटं च नाड़ी चैते गुणाधिकाः।।[1]

**वर्णविचारः ---**

मीनालिकर्कटा विप्राः क्षत्री मेषो हरिर्धनुः।
शूद्रो युग्मं तुलाकुंभौ वैश्यः कन्या वृषो मृगः।।
वर्णज्येष्ठा तु या नारी वर्णहीनस्तु यः पुमान्।
विवाहं यदि कुर्वीत तस्य भर्ता विनश्यति।।[2]

**वर्णचक्रम्**

| वर्णः | ब्राह्मणः | क्षत्रियः | वैश्यः | शूद्रः |
|---|---|---|---|---|
| राशिः | 12/8/4 | 1/5/9 | 6/2/10 | 3/7/11 |

---

1.मु.चिन्तामणि-139

2.मु.चिन्तामणि-140-141

# वरकन्यावर्णवश्यगुणचक्रम्

| वश्यगुणाः<br>वरः | | | | | | |
|---|---|---|---|---|---|---|
| | च. | म. | ज. | व. | की. | |
| चतुष्पद | 2 | ’’ | 1 | 0 | 2 | |
| मानवः | ’’ | 2 | 0 | 0 | 0 | कन्या |
| जलचर | 1 | 0 | 2 | 2 | 2 | |
| वनचरः | 1 | 0 | 2 | 2 | 2 | |
| कीटः | 1 | 0 | 1 | 0 | 2 | |

| | विवाहे वर्णगुणाः<br>वरः | | | | |
|---|---|---|---|---|---|
| कन्या | | ब्रा. | क्ष | वै. | शू |
| | ब्राह्मण | 1 | 0 | 0 | 0 |
| | क्षत्रिय | 1 | 1 | 0 | 0 |
| | वैश्य | 1 | 1 | 1 | 0 |
| | शूद्र | 1 | 1 | 1 | 1 |

**वश्यविचारः ----**

मेषश्चैव चतुष्पदास्तु धनुषोऽन्तो वै मृगादिर्वृषः
सिंहः सर्पसमोऽलिरेव सततं कर्कस्तु कीआमिधः।
पूर्वार्धं धनुषश्च यच्च मिथुनं कन्या तुला द्वैपदं
ज्ञेयं कुंभशषौ जलाश्रितमिदं चार्द्धं मृगस्यापरम्।।[1]

**वश्यचक्रम्**

| | |
|---|---|
| चतुष्पदः | मकरपूर्वार्ध, मेषः, सिंहः, धनपरार्धं वृषभः |
| कीटः | कर्कः |
| सर्पः | वृश्चिकः |
| द्विपदः | तुला, मिथुन, कन्याः, धनपूर्वार्ध |
| जलचरः | मकरपरार्धं कुंभ, मीन |

---

1.बालबोध ज्यो. समुच्चय, 142, पृ.-121

**ताराविचारः ----**

कन्यर्क्षाद्वरभं यावत्कन्याभं वरभादपि।

गणयेन्नवभिः शेषे त्रीष्वद्रिभमसत्स्मृतम्।।[1]

**तारागुणचक्रम्**

| | 1 | 2 | 3 | 4 | 5 | 6 | 7 | 8 | 9 |
|---|---|---|---|---|---|---|---|---|---|
| **1** | 3 | 3 | 1।। | 3 | 1।। | 3 | 1।। | 3 | 3 |
| **2** | 3 | 3 | 1।। | 3 | 1।। | 3 | 1।। | 3 | 3 |
| **3** | 1।। | 1।। | 0 | 1।। | 0 | 1।। | 0 | 1।। | 1।। |
| **4** | 1 | 3 | 1।। | 3 | 1।। | 3 | 1।। | 3 | 3 |
| **5** | 1।। | 1।। | 0 | 1।। | 0 | 1।। | 0 | 1।। | 1।। |
| **6** | 3 | 3 | 1।। | 3 | 1।। | 3 | 1।। | 3 | 3 |
| **7** | 1।। | 1।। | 0 | 1।। | 0 | 1।। | 0 | 1।। | 1।। |
| **8** | 3 | 3 | 1।। | 3 | 1।। | 3 | 1।। | 3 | 3 |
| **9** | 3 | 3 | 1 | 3 | 1।। | 3 | 1।। | 3 | 3 |

-------------------------------------------

1.बालसमुच्चय, 144, पृ.–122

**योनिविचारः ---**

अश्विनी वारुणश्चोश्वो रेवती भरणी गजः।
पुष्यश्च कृत्तिका छागो नागश्च रोहिणी मृगः।।
आर्द्रा मूलमपि श्वा च मूषकः फाल्गुनी मघा।
मार्जारो दितिराश्लेषा गोजातिरुत्तराद्वयम्।।
व्याघ्रश्चित्रा विशाखा च श्रुत्स्याषाढौ च मर्कटौ।।
स्याद्वैश्वाभिजितौ बभ्रुः सिंहो पूभावसू मतः।
योनयः कथिता भानां वैरं मैत्र्यं विचारयेत्।।[1]

**योनिवैरम्ः ---**

गोव्याघ्रं गजसिंहमश्वमहिषं श्वैवणं च बभ्रूरगं-
वैरं वानरमेषकं च सुमहत्तद्वद्विडालोन्दुरम्।
लोकानां व्यवहारतोऽन्यदपि च ज्ञात्वा प्रयत्नादिदं
दम्पत्योर्नृपभृत्योरपि सदा वर्ज्यं शुभास्यार्थिभिः।।[2]

---

1. बालबोध ज्यो. समुच्चय. - 145-148, पृ.-122-123
2. बालबोध ज्यो.समुच्चय. - 149, पृ.-123

# योनिगुणचक्रम

| | | अ. | गज | मे. | स. | श्वा. | मा. | मू | गौ | महि | व्या. | मृग | वन | नकु | सिं |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | अश्वः | 4 | 2 | 3 | 2 | 2 | 3 | 3 | 3 | 0 | 1 | 3 | 2 | 2 | 1 |
| | गजः | 2 | 4 | 3 | 2 | 2 | 3 | 3 | 3 | 3 | 1 | 3 | 2 | 2 | 0 |
| | मेषः | 3 | 3 | 4 | 2 | 2 | 3 | 3 | 3 | 3 | 1 | 3 | 0 | 2 | 1 |
| | सर्पः | 2 | 2 | 2 | 4 | 2 | 1 | 1 | 2 | 2 | 2 | 2 | 1 | 0 | 2 |
| | श्वानः | 2 | 2 | 2 | 2 | 4 | 1 | 2 | 2 | 2 | 2 | 0 | 2 | 2 | 2 |
| | मार्जारः | 3 | 3 | 3 | 1 | 1 | 4 | 0 | 3 | 3 | 2 | 3 | 2 | 2 | 2 |
| कन्या | मूषकः | 3 | 3 | 3 | 1 | 2 | 0 | 4 | 3 | 3 | 2 | 3 | 2 | 1 | 1 |
| | गौ | 3 | 3 | 3 | 2 | 2 | 3 | 3 | 4 | 3 | 0 | 3 | 2 | 2 | 1 |
| | महिषः | 0 | 3 | 3 | 2 | 2 | 3 | 3 | 3 | 4 | 1 | 3 | 2 | 2 | 3 |
| | व्याघ्रः | 1 | 1 | 1 | 2 | 2 | 2 | 2 | 0 | 1 | 4 | 1 | 2 | 2 | 1 |
| | मृगः | 3 | 3 | 3 | 2 | 0 | 3 | 2 | 3 | 3 | 1 | 4 | 2 | 2 | 1 |
| | वानरः | 2 | 0 | 1 | 2 | 2 | 2 | 2 | 2 | 2 | 2 | 2 | 4 | 2 | 2 |
| | नकुलः | 2 | 2 | 2 | 0 | 2 | 2 | 1 | 2 | 2 | 2 | 2 | 2 | 4 | 2 |
| | सिंहः | 1 | 0 | 1 | 2 | 2 | 2 | 2 | 1 | 1 | 3 | 1 | 2 | 2 | 4 |

**ग्रहमैत्रीविचारः ---**

रवेः समो ज्ञो मित्राणि चन्दारेज्याः परावरी।
इन्दोर्न शत्रवो मित्रे रविज्ञावितरे समाः।।
समौ कुजस्य शुक्रर्की बुधोऽरिः सुहृदः परे।
ज्ञस्य चन्द्रो रिपुमित्रे शुक्रार्कावितरे समाः।।
गुरोरारार्केन्दुमित्राण्यार्की मध्यः परावरी।
भृगोः समवीज्यकुजौ मित्रे ज्ञार्की परौ रिपू।।[1]
शनेर्गुरुः समो मित्रे शुक्रज्ञौ शत्रवः परे।।(कश्यपः)

## ग्रहमैत्रीचक्रम्

| **ग्रहाः** | **सूर्य** | **चन्द्र** | **मंगल** | **बुधः** | **गुरु** | **शुक्रः** | **शनि** |
|---|---|---|---|---|---|---|---|
| **मित्राणि** | चं.गु.मं. | सू. बु. | सू.चं.गु. | सू.शु. | सू.चं.मं | बु.श. | बु.शु. |
| **समाः** | बु. | मं.गु. शु.श. | शु.श. | मं.गु. श. | श | मं.गु. | गु. |
| **शत्रवः** | गु.श. | 0 | बु. | चं. | बु.श. | सू.चं. | सू.चं.मं. |

---

1.बालबोध ज्यो. समुच्चय–150–152, पृ.125

**ग्रहमैत्रीफलम् :---**

अन्योन्यमित्रं शस्तं स्यात्सममित्रं तु मध्यमम्।
उदासीनं कनिष्ठं स्यान्मृतिदं शात्रवं स्मृतम्।।
शत्रुमित्रं च विज्ञेयं दम्पत्योः कलहप्रदम्।
अन्योन्यसमशत्रुत्वं दम्पत्योर्विरहप्रदम्।।[1] (बा.ज्यो.)

**ग्रहमैत्रीगुणचक्रम् (वरः)**

| | | सूर्य | चन्द्रः | मंगल | बुध | गुरु | शुक्र | शनि |
|---|---|---|---|---|---|---|---|---|
| | सूर्य | 5 | 5 | 5 | 3 | 5 | 0 | 0 |
| | चन्द्र | 5 | 5 | 4 | 1 | 4 | ॥ | ॥ |
| **कन्या** | मंगल | 5 | 4 | 5 | ॥ | 5 | 3 | ॥ |
| | बुध | 3 | 1 | ॥ | 5 | ॥ | 5 | 4 |
| | गुरु | 3 | 4 | 5 | ॥ | 5 | ॥ | 3 |
| | शुक्र | 5 | ॥ | 3 | 5 | ॥ | 5 | 5 |
| | शनि | 5 | ॥ | ॥ | 4 | 3 | 5 | 5 |

**गणविचारः ----**

अश्विनीमृगरेवत्यो हस्तः पुष्यः पुनर्वसुः।
अनुराधा श्रुतिः स्वाती कथ्यते देवतागणः।।
तिस्रः पूर्वाश्रोत्तराश्च तिस्रोऽप्यार्द्रा च रोहिणी।
भरणी च मनुष्याख्यो गणश्च कथितो बुधैः।।
कृत्तिका च मघाऽऽश्लेषा विशाखा शततारका।
चित्रा ज्येष्ठा धनिष्ठा च मूलं रक्षोगणः स्मृतः।।[1]

**गणविचारचक्रम्**

| गणगुणाः (वरः) | | | | | | नाड़ीगुणाः (वरः) | | | |
|---|---|---|---|---|---|---|---|---|---|
| **कन्या** | | देव | मनु. | राक्षस | **कन्या** | | आदि | मध्य | टंत |
| | देव | 6 | 5 | 1 | | आदि | 0 | 8 | 8 |
| | मनुष्य | 6 | 6 | 0 | | मध्य | 8 | 0 | 8 |
| | राक्षस | 1 | 0 | 6 | | अंत | 8 | 8 | 0 |

---

1.बालबोध ज्यो. समुच्चय, 155-157, पृ.-126

**गणफलम् विचारः ----**

स्वगणे चोत्तमा प्रीतिर्मध्यमाऽमरमृत्ययोः।
मर्त्यराक्षसोर्मृत्युः कलहो देवराक्षसोः।।
राक्षसी यदि वा नारी नरो भवति मानुषः।
मृत्युस्तत्र न संदेहो विपरीतः शुभावहः।।[1]

गणफलचक्रम्

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| राक्षस | मघा | आश्ले. | ध. | ज्येष्ठा | मूल | श. | कृ. | चि. | वि. |
| मनुष्य | पू.भा | पू.षा. | पू.फा | उ.भा. | उ.षा. | उ.फा | रो. | भ. | आ. |
| देवता | अनुराधा | पुन. | मृग. | श्रवण | रेवती | स्वा. | ह. | अ. | पुष्य |

**भकूटविचारः ----**

चतुर्थो दशमश्चैव तृतीयैकादशः शुभः।
उभयोः सप्तमः साम्यमेकर्क्षं शुभमुच्यते।।[2]

---

1.बालबोध ज्यो. समुच्चय, 158-159, पृ.-127

2.बालबोध ज्यो. समुच्चय, 160, पृ.-128

# राशिकूटगुणचक्रम्  (वरस्य)

| | | मेष | वृष | मिथु | कर्क | सिंह | कन्या | तुला | वृशि. | धनु | म. | कुंभ | मीन |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | मे. | ७ | 0 | ७ | ७ | 0 | 0 | ७ | 0 | 0 | ७ | ७ | 0 |
| | वृ. | 0 | ७ | 0 | ७ | ७ | 0 | 0 | ७ | 0 | 0 | ७ | ७ |
| | मि. | ७ | 0 | ७ | 0 | ७ | ७ | 0 | 0 | ७ | 0 | 0 | ७ |
| | कर्क | ७ | ७ | 0 | ७ | 0 | ७ | ७ | 0 | 0 | ७ | 0 | 0 |
| | सिंह | 0 | ७ | ७ | 0 | ७ | 0 | ७ | ७ | 0 | 0 | ७ | 0 |
| | कन्या | 0 | 0 | ७ | ७ | 0 | ७ | 0 | ७ | ७ | 0 | 0 | ७ |
| कन्या | तुला | ७ | 0 | 0 | ७ | ७ | 0 | ७ | 0 | ७ | ७ | 0 | 0 |
| | वृ. | 0 | ७ | 0 | 0 | ७ | ७ | 0 | ७ | 0 | ७ | ७ | 0 |
| | धनु | 0 | 0 | ७ | 0 | 0 | ७ | ७ | 0 | ७ | 0 | ७ | ७ |
| | मकर | ७ | 0 | 0 | ७ | 0 | 0 | ७ | ७ | 0 | ७ | 0 | ७ |
| | कुंभ | ७ | ७ | 0 | 0 | ७ | 0 | 0 | ७ | ७ | 0 | ७ | 0 |
| | मीन | 0 | ७ | ७ | 0 | 0 | ७ | 0 | 0 | ७ | ७ | 0 | ७ |

**नाड़ीविचारः ----**

**आद्यनाड़ीनक्षत्राणिः---**

अश्विन्यार्द्रा शतभिषक् ज्येष्ठा हस्तः पुनर्वसुः।
पूर्वाभाद्रपदा मूलं चोत्तरा त्वाद्यानाड़िका।।[1]

**मध्यनाड़ीनक्षत्राणिः---**

पूर्वाफाल्गुनिका चित्रा धनिष्ठा भरणी मृगः।
पूर्वाषाढाऽनुराधाऽहिर्बुध्न्यं पुष्यश्च मध्यमा।।[2]

**अन्त्यनाडीनक्षत्राणिः---**

कृत्तिका रोहिणी स्वाती मघाऽऽश्लेषा च रेवती।
श्रवणश्चोत्तराषाढा विशाखा स्वन्त्सनाडिका।।[3]

**नाड़ीचक्रम् :---**

अग्रनाड़ी व्यधेद्भर्ता मध्यनाड़ी व्यधेद्द्वयम्।
पृष्ठनाड़ी व्यधेत्कन्या म्रियते नात्र संशयः।।[4]

---

1. बालबोध ज्यो. समुच्चय, 168, पृ.-131
2. बालबोध ज्यो. समुच्चय, 169, पृ.-131
3. बालबोध ज्यो. समुच्चय, 170, पृ.-131
4. बालबोध ज्यो. समुच्चय, 171, पृ.-131

## नाड़ीचक्रम

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| आद्यनाड़ी | अ. | आ. | पुन. | उ.फा | हस्त | ज्ये. | मूल | शत. | पू.भा |
| मध्यनाड़ी | भरणी | मृग. | पुष्य | पू.फा | चित्रा | अनु. | पू.षा | धनि. | उ.भा |
| अन्त्यनाड़ी | कृ. | रो. | आश्ले | मघा | स्वाती | वि. | उ.षा | श्रवण | रेवती |

**वर्णादीनां दोषाः ----**

नाड़ीदोषस्तु विप्राणां वर्णदोषस्तु क्षत्रियः।
गणदोषस्तु वैश्यानां योनिदोषस्तु पादजः।।

**आवश्यके शान्तिः ---**

षडष्टके गोमिथुनं प्रदद्यात्कांस्यां सरूप्यं नवपच्चमे च।
नाड्यां सुधेन्वन्नसुवर्णवस्त्रं द्विर्द्वादशे ब्राह्मणतर्पणं।।

**नवपञ्चमविचारः ---**

मीनालीभ्यां युते कीटे कुंभे मिथुनसंयुते।
मकरे कन्यकायुक्ते न कुर्यान्नवपञ्चमे।।
वरस्य पञ्चमे कन्या कन्याया नवमे वरः।
एतश्त्रिकोणं ग्राह्यं पुत्रपौत्रप्रवर्द्धनम्।।

**मृत्युषडष्टकम् विचारः ---**

मेषकन्येयोरेव तुलामीनकयोस्तथा।
युग्माल्योस्तु बुधैर्ज्ञेयो मृत्युर्वै नक्रसिंहयोः।।

# 3.और्ध्व–दैहिकक्रियायाम् कर्मकाण्डीयप्रयोगाः

संस्कृतवाङ्गमये मनुष्याणां विकासाय धर्मार्थकाममोक्षादीनाम् पुरुषार्थचतुष्टयस्य विवेचनम् प्राप्यते। तत्र मनुष्याणां जीवने सम्यग्रूपेण सर्वम् कार्यं स्यात एतदर्थम् संस्काराणां औचित्यमस्ति। संस्कारेषु और्ध्व–दैहिकम् अपरशब्देषु अन्त्येष्टिसंस्कारः इति स्वीक्रियते।

जीवनस्य परिसमाप्तिः मृत्ययोः भवति। इदं ध्रुव सत्यं सर्वैः स्वीक्रियते। प्रत्यक्षमपि दृश्यते अयं जीवात्मा स्वकर्मैः भोगान् उपभुज्य अंगुष्ठपर्व परिमितं अतिसूक्ष्मं अतिन्द्रीयं शरीरं धारयत्। यथोक्तम्––––

तत्क्षणात् सोऽथ गृहणाति शरीरं चातिवाहिकम्।

अंगुष्ठपर्वमात्रं तु स्वप्राणैरेव निर्मितम्।।[1]

मनुष्याणां स्वर्गं–नरकं वा प्रतिपद्यन्ते शुभानामशुभानां कर्मणां संचयः क्रियते। तस्मात् मनुष्यः मृतः यमलोकं प्रपद्यते। अस्य कर्मणः फलं मरणोपरान्ते प्राप्यते। मरणासन्नावस्तथाः अनत्येष्टि–श्राद्धादि कर्म पर्यन्तम् और्ध्व–दैहिक संस्कारः कथ्यते।

और्ध्व–दैहिकसंस्कारे प्रथम दिनतः प्रारभ्य द्वादशदिनानि पर्यन्तम् यत् सर्वम् धर्मशास्त्रीय दृष्ट्या कर्मकाण्डविधिः द्वारा एव सम्पद्यते।

**और्ध्व–दैहिक क्रियायाम् आवश्यक कर्माणि :–––**

देहत्यागोपरान्ते अनतयेष्टिकर्म भवति। तत्र तात्कालिकं कार्यं यथोक्तरूपेण क्रियते। तत्र षडपिण्डदानम् भवति। अस्य नाम

––––––––––––––––––––––––––––––––––––––––––

1.स्कन्द.– 1/2/50/62

मालिनीषोडशी कथ्यते। यथा --

अवजेननम्।

प्रतिज्ञासंकल्पः।

पिण्डदानसंकल्पः। इत्यादि

शवयात्रायां षडपिंडदानानि जातानि यथा ---

चितापिण्डप्रभृतितः प्रेतत्वमपुजायते।

तदादि तत्र तत्रापि प्रेतनामना प्रदीयते।।[1]

चितायां साधकं नाम वदन्त्येकं खगेश्वरः।

प्रेतपिण्ड प्रदद्याच्च दाहार्तिशमनं खगः।।[2]

एवं प्रकारेण षडपिण्डानि तत्र पृथक-पृथक नामतः दीयन्ते। ततः परम् अशौच नियमाः दाहकतृ अनेके नियमाः पालितव्याः भवन्ति। दशाकृत्यम्, दशगातपिण्डदानम्, एकादशः कृत्यम्, द्वादशाः कृत्यम् भवति। विषयेऽस्मिन् अनेकेषु पुराणेषु धर्मशास्त्रस्य ग्रन्थेषु च विस्तररूपेण वर्णनम् प्राप्यते। यथा ---

एकादशाहे प्रेतस्य दधाच्छ्रादं समन्तकं।[3]

---

1. गरुड़पुराण- प्रेत-15/37
2. गरुड़पुराण- प्रेत-2/5/31
3. गरुड़पुराण- प्रेत-24/40

श्राद्धविषयकं वर्णनं प्रायेण सर्वेषु पुराणेषु महाभारतादि ग्रन्थेषु प्राप्यते। अस्मिन् विषये अनेकानि पुस्तकानि स्वातन्त्र्यरूपेण वर्णनं क्रियन्ते। यथा --

1. कात्यायनस्मृतिः।
2. वीरमित्रोदयः।
3. याज्ञवल्क्यस्मृतिः।
4. श्राद्धप्रकाशिकाः।
5. हेमादिवचनम्।
6. ब्रह्मपुराणम्।
7. कूर्मपुराणम्।
8. प्रयोगपारिज्जात।
9. श्राद्धविवेका।
10. स्मृतिरत्नाकरः।
11. नारदपुराणम्।
12. संस्कारभास्करः

इत्यादयाः ग्रन्थाः और्ध्व-दैहिकम् कार्यम् कथं भवेत् इत्यस्य सांङ्गोपांङ्ग विवेचनम् क्रियते।

और्ध्व-दैहिकस्य क्रियाः कीदृशी भवेत इत्यस्य विवेचनं अत्र उपास्थाप्यते।

1. देहत्यागोपरान्स्य कृत्यम्।
2. षडपिण्डदानम्।

3. दशाकृत्यम्।

4. एकादशाःकृत्यम्। (तत्र नारायणबलिः, उत्तमषोडशी।)

5. द्वादशाःकृत्यम्। तत्र सपिण्डीकरणं, श्राद्धं च इत्यादीनि कर्माणि तत्र भवन्ति।

वस्तुस्तु श्राद्धस्यावसरः षडनवति (96) भवति। तद्यथा --

1. द्वादशमासस्य अमावस्याः।

2.सतयुगादि प्रारम्भतिथिः।

3.मन्वन्तरस्य आरम्भतिथिः।

4.द्वादशसंक्रान्तयः।

5.द्वादशवैधृतियोगः।

6.द्वादशव्यतीपातयोगः।

7.पच्चदशमहालयश्राद्धम्। (पितृपक्षः)

8.पंचाष्टकाः।

9.अन्वष्टकाश्च इत्यादयाः अवसराः श्राद्धानाम आहत्य 96 अवसरा भवन्ति। लिखितं यत् ---

अमायुगमनुक्रान्ति धृतिपातमहालयाः।
अष्टकाऽवष्टका पूर्वेधुः श्राद्धर्नवतिश्च षड्।।

---

1.धर्मसिन्धु

पित्र्ये रात्र्यहनी मासः प्राविभागस्तु पक्षयोः।

कर्मचेष्टास्वहः कृष्णः शुक्लः स्वपनाय शर्वरी।।[1]

गौतमधर्मसूत्रेऽपि और्ध्वदैहिकस्य कर्म निगदितं यथा ---

नित्यं नैमित्तकं काम्यं वृद्धि श्राद्धमथापरम्।

पार्वणं चेति विज्ञेयं श्राद्धं पंचविधं बुधैः।।[2]

विषयेऽस्मिन् विस्तरेण तत्र महर्षिणा वर्णितम्। और्ध्वदैहिक क्रियायाम् ये नियमाः वर्णिताः उद्धृताः कथिताश्च ते सर्वे पुराणेषु प्राप्यन्ते। पुराणानानि यद् वर्णनं उपलभ्यते तद्सर्वम् स्मृतिनामेव निदर्शनं अस्ति। स्मृति ग्रन्थेभ्यः एव उद्धह्रीयते। अनेन कारणेन और्ध्वदैहिक क्रियायाम् यत् पौरोहित्यम् क्रीयते तत् सर्वम् धर्मशास्त्रीयदृष्टैव भवति। अयमेव कर्मकाण्डीय प्रयोगाः कथ्यते। ब्रह्मपुराणे निर्देशाः प्राप्यते यथा--

वायव्यग्रसारी तद्रूप देहमन्यत् प्रपद्यते।

तत्कर्मयातनार्थे च न मातृपितृसम्भवम्।।[3]

श्राद्धविषयकं और्ध्वदैहिक यत्कार्यम् तद्विषये कूर्मपुराणे प्राप्यते। यथा ---

---

1.मनुस्मृतिः -1/66

2.गौतमञ्ह 6/11

3.ब्रह्मपुराण-2/14/46

देशकाले च पात्रे च श्रद्धया विधीना च यत्।

पितृनुदिद्दश्य विप्रेभ्यो दत्तम् श्राद्धमुदाहृतम्।।[1]

अस्माकं शास्त्रेषु पुराणेषु मृत्योः स्वरूपं मरणासन्ननाम् जनानाम् अवस्था तत्कल्याणाय अन्तिमे समये क्रियमाणं कृत्यं यद्भवति तत् और्ध्वदैहिकम् उत्तरक्रिया च कथ्यते। विषयेऽस्मिन् प्राणान्ते इदं भवति।

**और्ध्वदैहिकसंस्काराः** ---

और्ध्वदैहिकसंस्काराः इदृशी भवति।

1. पिण्डदानम्
2. तर्पणम्
3. श्राद्धम्
4. अशौचादि निर्णयः
5. कर्मविपाकः
6. पापानां प्रायश्चित्तविधानं च सर्वम् यथाविधिः क्रियते। पितृकर्मणः यानि पुस्तकानि सम्प्रति प्राप्तानि भवति तेषु सर्वेषु पुस्तकेषु और्ध्वदैहिक क्रियायाः यथाविधिः वर्णनं पुराणाधारितं प्राप्यते।

---

1.कूर्मपुराण

# 4.यज्ञादिषु ज्योतिषशास्त्रस्य आवश्यकता

भारतीयशास्त्रेषु श्रौतग्रन्थानां महत्त्वम् अत्यन्तं वर्तते। यतोहि सूत्रग्रन्था: महनीया: सन्ति। तत्र ---

अध्यापनं ब्रह्मयज्ञ: पितृयज्ञश्च तर्पणम्।

होमो दैवो बलिर्भूतं नृयज्ञोऽतिपूजनम्।।

इति स्मृतिग्रन्थेषु प्राप्यते। तत्र पंचमहायज्ञानां विवेचनं इदमस्ति। -

1. ब्रह्मयज्ञ:।
2. पितृयज्ञ:।
3. देवयज्ञ:।
4. मनुष्ययज्ञ:।
5. भूतयज्ञ:।[1]

**ब्रह्मयज्ञ: ---**

यदा वेदवेदाङ्गानां अध्ययनंक्रियते। पुराणानं पठन-पाठनं क्रियते अयमेव ब्रह्मयज्ञ: भवन्ति।

**पितृयज्ञ: ---**

पितृीणां उद्दिश्यं श्राद्धादिकर्म, तर्पणं ब्राह्मणभोजनादिकं यदा क्रियते सैव पितृयज्ञ:।

---

1.मनुसमृति: -3/70

**देवयज्ञः --**

गृहेषु यैः जनैः स्व-स्व इष्ट देवादीनां पूजनं क्रियते हवनं व क्रियते सैव देवयज्ञः इति।

**भूतयज्ञः ---**

भोजनाद्पूर्वम् बलिवैश्य देवाः भवति सैव भूतयज्ञः कथ्यते।

**मनुष्ययज्ञः ---**

अतिथिनां पूजनं आगतानां अतिथिनां सत्काराएव मनुष्ययज्ञः कथ्यते।

**दर्शपूर्णमासयज्ञः --**

यज्ञेषु महत्वम् पूर्वकालतः आसीत् अपि च एते यज्ञाः कदा करणीयः इति विषये ज्योतिषस्य आवश्यकता भवति। यथा दर्शपूर्णमास यज्ञः कदा क्रियते, यदा पूर्णिमा तिथिः समये सूर्यचन्द्रौ परस्परं अतीवदूरं अपि च चन्द्रः पूर्णरूपेण उदेति तदा दशपूर्णमास यज्ञः दिनद्वये भवति।

**अग्निोष्टियज्ञः ---**

अयं यज्ञः एकदिन साध्यं च कर्तुम् शक्यते।

**वाजपेययज्ञः --**

अस्य यज्ञस्य आयोजनं तैत्तरीयब्राह्मणे सांख्यायनश्रौतसूत्रे[1] इति प्राप्यतम् भवति अत्र ज्योतिषशास्त्रदृष्ट्या एव कालः स्वीक्रियते।

---

1.सांख्यान श्रौत.-15/1-4/4

**अग्राह्यणीयज्ञः ---**

इदं कर्मं श्रवण नक्षत्रात् मार्गशीर्षस्य पौर्णमास्यां भवति। अस्य विषये चतुर्भिमन्त्रैः आहुतयः भवन्ति। मार्जनं च मार्गशीर्षस्य मृगशिरा नक्षत्रे एव क्रियते। एवं प्रकारेण सर्वेषु यज्ञ विषयेषु जयोतिषशास्त्रस्य आवश्यकता भवति एव।

**पच्चमहायज्ञाः ---**

पच्चसूना ग्रहस्थस्य चुल्ली–पेषण्युपस्करः।
कण्डनी चोदकुम्भश्च वध्यते यास्तु वाहयन्।।
तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः।
पच्चक्लृप्ता महायज्ञा प्रत्यहं गृहेमोधिनाम्।।
होमो दैवो बलिर्भूतो नृयज्ञोऽतिथिपूजनम्।।[1]

**चुल्ली** :-- अग्निप्रज्वलनेन।

**पेषणं** :--- गोधूमादि पेषणेन।

**उपास्करम्** :-- मार्जनेन।

**कण्डनी** :-- कूटनेन।

**उदकुम्भः** -- जलपात्रस्य पार्श्वे कीटादि मरणेन इत्यादिषु कार्येषु जीवहत्या भवति। अनेन कारणेन पंचमहायज्ञानां आयोजनं गृहस्थानां कृते स्मृत्यादि ग्रंथेषु कथ्यते।

---

1.मनुस्मृति

अत्र नित्ययज्ञादीनां वर्णनमस्ति। किन्तु नैमित्तक यज्ञाः अपि भवन्ति। यथा --

ज्योतिष्टहोमयज्ञः, अग्निोष्टिौमियज्ञः, वाजपेययज्ञः, अश्वमेधयज्ञः, विष्णुयज्ञः, रुद्रयज्ञः देवीयागश्च इत्यादयाः बहुविध यज्ञाः भवन्ति। एतेषु यज्ञेषु यानि कर्माणि क्रियन्ते तानि कर्माणि कदा कर्तव्यानि कीदृशानि कर्तव्यानि, कसिमन् नक्षत्रे करणीयं, कस्मिन् योगे करणीयं, कस्यां राशि चन्द्रस्थिते, सूर्यस्थिते, गुरुवादीनाम् स्थितिपूर्वकं इति सर्वम् ज्योतिषदृष्ट्या सम्यक् विचार्यै व कर्तुम् शक्यते। भारतीय धर्मकार्यं किमपि शुभ कार्यं च विना ज्योतिषं न कर्तुं शक्यते। अतएव ज्योतिषस्य सर्वेषु कार्येषु आवश्यकता भवत्येव।